जन्तोः। कोष्ठं गत्वा क्षोभयन् यस्य रक्तं तच्चाधस्तात्काकनन्तीप्रकाशम्॥ वर्चोमिश्रं निः पुरीषं सगन्धं निर्गन्धं वा सार्य्यते तेन कोष्ठात्। शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः॥ (आमजः) आमाजीर्णैः प्रद्रुताः क्षोभयन्तः कोष्ठं दोषाः सम्प्रदुष्टाः सभक्तम्। नानावर्णं नैकशः सारयन्ति कृच्छ्राज्जन्तोः षष्ठमेनं वदन्ति॥

**अति(ती)सारकिन्** त्रि० अतिसारो रोगोऽस्यास्ति अतिसार+इनि-कुक्-च्। अतिसाररोगवति। [अतिसाररोगे।

**अतिसारिन्** पु० अत्यन्तं सारयति मलम् अति+सृ-णिनि।

**अतिसृज्य** त्रि० अति+सृज-क्यप्। त्याज्ये, सर्जनीये च।

**अतिसृष्ट** त्रि० अति+सृज-क्त। दत्ते, प्रेरिते च।

**अतिसौरभ** पु० अतिशयितं सौरभमस्य ब०। अत्यन्तामोदवति आम्रे। सौरभान्विते वस्तुमात्रे त्रि०। प्रा०स०। अत्यन्तसुरभिगन्धे न०। [माचरेदिति" स्मृतिः।

**अतिसौहित्य** न० प्रा०स०। अत्यन्ततृप्तौ "नातिसौहित्य-

**अतिस्तुति** स्त्री अति+स्तु-क्तिन् अतेः पूजार्थत्वादुपसर्गत्व बाधान्न षत्वम्। अविद्यमानगुणानुकीर्त्तने।

**अतिस्पर्श** त्रि० अतिक्रान्तः स्पर्शं वर्णोच्चारणप्रयत्नभेदं दानं वा। जिह्वाग्रादेः सम्पूर्णस्पर्शाभावेन ईषत्स्पर्शमात्रेण उच्चार्य्ये यवरलात्मके वर्णे स्वरवर्णे च "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथेति" शिक्षायां तेषामुच्चारणेऽस्पर्शेषत्स्पर्शयोरुक्तेस्तथात्वम्। दानहाने कृपणे अधमे च। "अतिस्पर्शौ वर्वरता च रेफे" इति। प्रा०स०। अत्यन्तस्पर्शे।

**अतिस्फिर** त्रि० प्रा०स०। अत्यन्तस्फूर्त्तिशालिनि, अतिवृद्धे च।

**अतिहसित** न० अति+हस-क्त। उच्चहासे। घञ्। अतिहासोऽप्यत्र पु०। [अति+हस्त+णि-अतिहस्तयति।

**अतिहस्ति** नामधातुः हस्तौ निरस्यति हस्तिनाऽतिक्रामति वा

**अतीक्ष्ण** त्रि० न०त०। तीक्ष्णत्वविरोधिमृदुत्ववति। विषयुद्धलौहरूपतीक्ष्णशब्दार्थभिन्ने न०।

**अतीत** त्रि० अति+इण-क्त। अतिक्रान्ते, भूतकाले च। तद्वृत्तौ आरब्धपरिसमाप्ते पदार्थमात्रे त्रि०। अतीतस्य वर्त्तमानध्वंसप्रतियोगी। भवति च अपचदित्यादौ पाकादेर्वर्त्तमानध्वंसप्रतियोगित्वम्। स च कालो द्विविधः अद्यतनः अनद्यतनश्च अद्यतनस्तु अतीतायाः रात्रेः पश्चार्द्धेन, आगामिन्याः पूर्व्वार्द्धेन च सहितः कालः। तत्र वृत्तिध्वंसप्रतियोगी अद्यतनातीतः तदतिरिक्तः अनद्यतनः। तत्रानद्यतने भूते लङ् (अपचत्) "अनद्यतने लङिति" सूत्रात् तस्यैव वक्तुरपारोक्ष्यविवक्षायां लिट् (पपाच) "परोक्षानद्यतने लिड़िति" सूत्रात्। भूतसामान्ये लुङ्। अपाक्षीत्। स्मशब्दादियोगे लटोऽपि भूतत्वमर्थः। कालस्तु क्रियान्वयी सर्वत्र, "क्रियाभेदाय कालस्त्विति" हर्य्युक्तेः। अतीतत्वादिकन्तु सर्वत्र प्रयोगकालमादायैव व्यवह्रियते इत्यादिकमाकरे दृश्यम्। अतीतकाले, "शीतेऽतीते वसनमशनमिति" "कालातीता वृथा सन्ध्येति" "संवत्सरे व्यतीते तु पुनरागमनाय चेति" तत्कालवृत्तौ "अलमतीतवार्त्तयेत्यादि"।

**अतीन्द्र** पु० अतिक्रान्त इन्द्रम् गुणैः अत्या०। इन्द्रगुणातिगे विष्णौ इन्द्रातिगमात्रे त्रि० "अतीन्द्रमतिरुद्रं च भवतश्चरितं परमिति" पुरा०।

**अतीन्द्रिय** त्रि० अतिक्रान्तमिन्द्रियं तदविषयत्वात् अत्या० स०। इन्द्रियायोग्ये अप्रत्यक्षे, "नेत्रश्रोत्रनासिकारसनात्वक्चेतांसीन्द्रियाणि तैर्ज्ञातुमशक्ये विषये। "ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते" भाषा० "यत्तत् सूक्ष्ममतीन्द्रियमिति" गीता। ईश्वरे च तस्य तथात्वम् वाह्येन्द्रियायोग्यत्वेनैव अन्यथा "मनसैवानुद्रष्टव्य" इति श्रुतौ ज्ञानविषयत्वमुक्तं विरुध्येत। "यन्मनसा न मनुते" इत्यादिकं तु अशुद्धमनसोऽविषयत्वपरम्। अत एव "विशुद्धचेतसा गम्यमिति" वाक्यान्तरम्। किञ्च वेदान्तिमते ज्ञानं द्विविधं वृत्तिरूपं तदवच्छिन्नमनोवृत्तिप्रतिविम्बितचैतन्यरूपञ्च तत्र वाह्येन्द्रियाणां रूपादिष्वेव ग्राहकत्वमीश्वरस्य रूपादेरभावेन वाह्येन्द्रिययोग्यत्वाभावेऽपि मनोवृत्तिविषयत्वमस्त्येव अतिसूक्ष्मत्वाच्च नाशुद्धमनोविषयत्वमित्येव भेदः। किन्तु मनोवृत्तिविषयत्वेऽपि तदवच्छिन्नचैतन्याविषयत्वात्तस्य मानसाविषयत्वम् अतएवोक्तमभियुक्तैः "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति"। अन्यथा विषयगताज्ञाननिवृत्तिं प्रति स्वविषयकमनोवृत्तेः कारणतया तदभावे कथंकारं? तद्गताज्ञाननिवृत्तिः स्यात् एतत्पक्षेऽप्यतीन्द्रियत्वं तज्जन्यवृत्त्यवच्छिन्नचैतन्याविषयत्वेन द्रष्टव्यम्।

**अतीव** अव्य० अत्येव—इवः अवधारणे प्रा०स०। अवधृतातिशयेऽत्यन्तातिशये च। अतीव विव्यथे" इति भार०। "अतीव सुकुमाराङ्गीति"। "उच्चैःशिरसामतीवेति" कु०।

**अतुल** पु० नास्ति तुला शुभ्रपुष्पतायामस्याः। तिलकवृक्षे तुलारहिते त्रि०। "रामस्त्वतुलविक्रम" इति रामा०।